श्री महात्रिपुरसुंदरी हृदयं

श्री महात्रिपुरसुंदरी हृदयं

वंदे सिंदूरवर्णाभं वामोरुन्यस्तवल्लभं |
इक्षुवारिधिमध्यस्थमिभराजमुखं महः || 1 ||

गंभीरलहरीजालगंडूषितदिगंतरः |
अव्यान्माममृतांभोधिरनर्घमणिसंयुतः || 2 ||

मध्ये तस्य मनोहारि मधुपारवमेदुरं |
प्रसूनविगलन्माध्वीप्रवाहपरिपूरितं || 3 ||

किन्नरीगानमेदस्वि क्रीडाकंदरदंतुरं |
कांचनद्रुमधूलीभिः कल्पितावालवद्द्रुमं || 4 ||

मुग्धकोकिलनिक्वाणमुखरीकृतदिङ्मुखं |
मंदारतरुसंतानमंजरीपुंजपिंजरं || 5 ||

नासानाडिंधमस्मेरनमेरुसुमसौरभं |
आवृंतहसितांभोजदीव्यद्विभ्रमदीर्घिकं || 6 ||

मंदरक्तशुकीदष्टमातुलुंगफलान्वितं |
सविधस्यंदमानाभ्रसरित्कल्लोलवेल्लितं || 7 ||

प्रसूनपांसुसौरभ्यपश्यतोहरमारुतं |
वकुलप्रसवाकीर्णं वंदे नंदनकाननं || 8 ||

तन्मध्ये नीपकांतारं तरणिस्तंभकारणं |
मधुपालिविमर्दालिकलक्वाणकरंबितं || 9 ||

कोमलश्वशनाधूतकोरकोद्गतधूलिभिः |
सिंदूरितनभोमार्गं चिंतितं सिद्धवंदिभिः || 10 ||

मध्ये तस्य मरुन्मार्गलंबिमाणिक्यतोरणं |
शाणोल्लिखितवैदूर्यक्लुप्तसालसमाकुलं || 11 ||

माणिक्यस्तंभपटलीमयूखव्याप्तदिक्तटं |
पंचविंशतिसालाढ्यां नमामि नगरोत्तमं || 12 ||

तत्र चिंतामणिगृहं तडित्कोटिसमुज्ज्वलं |
नीलोत्पलसमाकीर्णनिर्यूहशतसंकुलं || 13 ||

सोमकांतमणिक्लुप्तसोपानोद्भासिवेदिकं |
चंद्रशालाचरत्केतुसमालीढनभोंतरं || 14 ||

गारुत्मतमणीक्लुप्तमंडपव्यूहमंडितं |
नित्यसेवापरामर्त्यनिबिडद्वारशोभितं || 15 ||

अधिष्ठितं द्वारपालैरसितोमरपाणिभिः |
नमामि नाकनारीणां सांद्रसंगीतमेदुरं || 16 ||

तन्मध्ये तरुणार्काभं तप्तकांचननिर्मितं |
शक्रादिमद्द्वारपालैः संततं परिवेष्टितं || 17 ||

चतुष्षष्टिमहाविद्याकलाभिरभिसंवृतं |
रक्षितं योगिनीबृंदै रत्नसिंहासनं भजे || 18 ||

मध्ये तस्य मरुत्सेव्यं चतुर्द्वारसमुज्ज्वलं |
चतुरस्त्रिरेखाढ्यां चारुत्रिवलयान्वितं || 19 ||

कलादलसमायुक्तं कनदष्टदलान्वितं |
चतुर्दशारसहितं दशारद्वितयान्वितं || 20 ||

अष्टकोणयुतं दिव्यमग्निकोणविराजितं |
योगिभिः पूजितं योगियोगिनीगणसेवितं || 21 ||

सर्वदुःखप्रशमनं सर्वव्याधिविनाशनं |
विषज्वरहरं पुण्यं विविधापद्विदारणं || 22 ||

सर्वदारिद्र्यशमनं सर्वभूपालमोहनं |
आशाभिपूरकं दिव्यमर्चकानामहर्निशं || 23 ||

अष्टादशसुमर्माढ्यं चतुर्विंशतिसंधिनं |
श्रीमद्बिंदुगृहोपेतं श्रीचक्रं प्रणमाम्यहं || 24 ||

तत्रैव बैंदवस्थाने तरुणादित्यसन्निभं |
पाशांकुशधनुर्बाणपरिष्कृतकरांबुजं || 25 ||

पूर्णेंदुबिंबवदनं फुल्लपंकजलोचनं |
कुसुमायुधशृंगारकोदंडकुटिलभ्रुवं || 26 ||

चारुचंद्रकलोपेतं चंदनागुरुरूषितं |
मंदस्मितमधूकालिकिंजल्कितमुखांबुजं || 27 ||

पाटीरतिलकोद्भासिफालस्थलमनोहरं |
अनेककोटिकंदर्पलावण्यमरुणाधरं || 28 ||

तपनीयांशुकधरं तारुण्यश्रीनिषेवितं |
कामेश्वरमहं वंदे कामितार्थप्रदं नृणां || 29 ||

तस्यांकमध्यमासीनां तप्तहाटकसन्निभां |
माणिक्यमुकुटच्छायामंडलारुणदिङ्मुखां || 30 ||

कलवेणीकनत्फुल्लकह्लारकुसुमोज्ज्वलां |
उडुराजकृतोत्तंसामुत्पलश्यामलालकां || 31 ||

चतुर्थीचंद्रसच्छात्रफालरेखापरिष्कृतां |
कस्तूरीतिलकारूढकमनीयललंतिकां || 32 ||

भ्रूलताश्रीपराभूतपुष्पायुधशरासनां |
नालीकदलदायादनयनत्रयशोभितां || 33 ||

करुणारससंपूर्णकटाक्षहसितोज्ज्वलां |
भव्यमुक्तामणिचारुनासामौक्तिकवेष्टितां || 34 ||

कपोलयुगलीनृत्यकर्णताटंकशोभितां |
माणिक्यवालीयुगलीमयूखारुणदिङ्मुखां || 35 ||

परिपक्वसुबिंबाभापाटलाधरपल्लवां |
मंजुलाधरपर्वस्थमंदस्मितमनोहरां || 36 ||

द्विखंडद्विजराजाभगंडद्वितयमंडितां |
दरफुल्ललसद्गंडधवलापूरिताननां || 37 ||

पचेलिमेंदुसुषमापाटच्चरमुखप्रभां |
कंधराकांतिहसितकंबुबिंबोकडंबरां || 38 ||

कस्तूरीकर्दमाश्यामकंधरामूलकंदरां |
वामांसशिखरोपांतव्यालंबिघनवेणिकां || 39 ||

मृणालकांडदायादमृदुबाहुचतुष्टयां |
मणिकेयूरयुगलीमयूखारुणविग्रहां || 40 ||

करमूललसद्रत्नकंकणक्वाणपेशलां |
करकांतिसमाधूतकल्पानोकहपल्लवां || 41 ||

पद्मरागोर्मिकाश्रेणिभासुरांगुलिपालिकां |
पुंड्रकोदंडपुष्पास्त्रपाशांकुशलसत्करां || 42 ||

तप्तकांचनकुंभाभस्तनमंडलमंडितां |
घनस्तनतटीक्लुप्तकाश्मीरक्षोदपाटलां || 43 ||

कूलंकषकुचस्फारतारहारविराजितां |
चारुकौसुंभकूर्पासच्छन्नवक्षोजमंडलां || 44 ||

नवनीलघनश्यामरोमराजिविराजितां |
लावण्यसागरावर्तनिभनाभिविभूषितां || 45 ||

डिंभमुष्टितलग्राह्यमध्ययष्टिमनोहरां |
नितंबमंडलाभोगनिक्वणन्मणिमेखलां || 46 ||

संध्यारुणक्षौमपटीसंछन्नजघनस्थलां |
घनोरुकांतिहसितकदलीकांडविभ्रमां || 47 ||

जानुसंपुटकद्वंद्वजितमाणिक्यदर्पणां |
जंघायुगलसौंदर्यविजितानंगकाहलां || 48 ||

प्रपदच्छायसंतानजितप्राचीनकच्छपां |
नीरजासनकोटीरनिघृष्टचरणांबुजां || 49 ||

पादशोभापराभूतपाकारितरुपल्लवां |
चरणांभोजशिंजानमणिमंजीरमंजुलां || 50 ||

विबुधेंद्रवधूत्संगविन्यस्तपदपल्लवां |
पार्श्वस्थभारतीलक्ष्मीपाणिचामरवीजितां || 51 ||

पुरतो नाकनारीणां पश्यंतीं नृत्तमद्भुतं |
भ्रूलतांचलसंभूतपुष्पायुधपरंपरां || 52 ||

प्रत्यग्रयौवनोन्मत्तपरिफुल्लविलोचनां |
ताम्रोष्ठीं तरलापांगीं सुनासां सुंदरस्मितां || 53 ||

चतुरर्थध्रुवोदारां चांपेयोद्गंधिकुंतलां |
मधुस्नपितमृद्वीकमधुरालापपेशलां || 54 ||

शिवां षोडशवार्षीकां शिवांकतलवासिनीं |
चिन्मयीं हृदयांभोजे चिंतयेज्जापकोत्तमः || 55 ||

इति त्रिपुरसुंदर्या हृदयं सर्वकामदं |
सर्वदारिद्र्यशमनं सर्वसंपत्प्रदं नृणां || 56 ||

तापज्वरार्तिशमनं तरुणीजनमोहनं |
महाविषहरं पुण्यं मांगल्यकरमद्भुतं || 57 ||

अपमृत्युहरं दिव्यमायुष्यश्रीकरं परं |
अपवर्गैकनिलयमवनीपालवश्यदं || 58 ||

पठति ध्यानरत्नं यः प्रातः सायमतंद्रितः |
न विषादैः स च पुमान् प्राप्नोति भुवनत्रयं || 59 ||

इति श्रीमहात्रिपुरसुंदरीहृदयं संपूर्णं |